National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(23): 64-65
© 2019 NJHSR
www.sanskritarticle.com

**Kuppa Narasimha**
Research scholar in Nyaya,
R.S.Vidyapeetha,Tirupati (A.P.)

**Correspondence:**
**Kuppa Narasimha**
Research scholar in Nyaya,
R.S.Vidyapeetha,Tirupati(A.P.)

# द्वैतवेदान्तोक्तानि विश्वमिथ्यात्वे सत्प्रतिपक्षानुमानानि

**Kuppa Narasimha**

**उपक्रमः –**

**विश्वं सत्यं यन्निकेत सत्यमित्तन्नमोघम्, याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः** इत्यादिश्रुतिप्रामाण्यात्, प्रपञ्चस्य सत्यत्वम् अभ्युपगन्तव्यम्। किन्तु अद्वैतिभिः अन्यार्थत्वेन व्याख्येयानां श्रुतीनां अद्वितीयब्रह्मपरत्वं व्याख्याय, ब्रह्मणः अद्वितीयत्वसिद्ध्यर्थं ब्रह्मभिन्नदृश्यमात्रस्य मिथ्यात्वम् अभ्युपगच्छन्ति।।

यद्यपि **असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्** इति गीतायां जगदसत्यत्ववादमनूद्य निन्दा कृता। एवं **नाभाव उपलब्धेः, वैधर्म्याच्च न स्वप्नादिवत्** इत्यादि सूत्रेषु जगन्मिथ्यात्ववादः निराकृतः। तथापि तानि अन्यार्थत्वेन व्याख्याय जगन्मिथ्यात्वमेव अवलम्बन्ति । तत्र अनुमानमपि आहुः –

**विमतं मिथ्या। दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् । शुक्तिरूप्यवत्**।। इत्यादयः।

अतः जगन्मिथ्यात्वनिराकरणपूर्वकं तत्सत्यत्वव्यवस्थापनार्थं न्यायामृतकारैः श्रीव्यासतीर्थाचार्यैः षड्भिः हेतुभिः मिथ्यात्वानुमानस्य सत्प्रतिपक्षः कृतः। कृते च तस्मिन् उक्तमिथ्यात्वानुमितिप्रतिबन्धो भवति । ततश्च श्रुतियुक्तिभिः द्वैतसत्यत्वं पर्यवस्यति ।

**न्यायामृतोक्तानि सत्प्रतिपक्षानुमानानि –**

अनुमानबाधिताश्च दृश्यत्वादयः तथा हि, **ब्रह्मप्रमान्येन वा वेदान्ततात्पर्यप्रमितिजन्यज्ञानान्येन वा मोक्षहेतुज्ञानान्येन वा अबाध्यत्वे सति असत्वानधिकरणत्वे सति ब्रह्मान्यत् विमतं वा, सद्वा परमार्थसद्वा। प्रातिभासिकत्वानधिकरणत्वे सति असत्वानधिकरणत्वात्, अनिषेध्यत्वेन प्रमां प्रति साक्षाद्विषयत्वात् अनिषेध्यत्वेन ईश्वरं प्रति साक्षादपरोक्षत्वात् सप्रकारकाबाध्यार्थक्रियाकारित्वात्, आरोपितमिथ्यात्वकत्वात्, कल्पकरहितत्वाच्च । आत्मवत्** ।।[1]

**पक्षनिर्देशः –**

अत्र ब्रह्मभिन्नं इति पक्षः। तत्र सत्यत्वं साध्यते। किन्तु तथा सति, शुक्तिरूप्यादिप्रातिभासिकपदार्थस्यापि ब्रह्मभिन्नत्वात्, सोऽपि शुक्तिरूप्यादिः पक्षस्संवृत्तः। ततश्च तस्य मिथ्यात्वेन सत्यत्वरूपसाध्यस्य अभावात् अंशतः बाधः । अतः ब्रह्मप्रमान्येन अबाध्यत्वे सति इति पक्षे विशेषणं देयं। शुक्तिरूप्यादिकञ्च ब्रह्मप्रमान्येन शुक्त्यादितत्त्वज्ञानेन बाध्यते। अतः उक्तः – अबाध्यत्वान्तपक्षतावच्छेदकाभावात् शुक्तिरूप्यस्य न पक्षत्वं ततश्च न तत्र बाधः इति।।

किन्तु भामतीकारैः वाचस्पतिमिश्रैः ब्रह्मणः वृत्तिव्याप्यत्वानङ्गीकारात् ब्रह्मप्रमैव अप्रसिद्धा इति कृत्वा ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति इति विशेषणप्रक्षेपः न युज्यते। अतः तन्मतसाधारण्याय वेदान्ततात्पर्यप्रमितिजन्यज्ञानान्येन अबाध्यत्वे सति इति विशेषणं देयम्। वेदान्ततात्पर्यप्रमितिजन्यं यत् शुद्धविषयकं उपहितब्रह्मविषयकं वा ज्ञानं तदन्येन शुक्त्यादितत्वज्ञानेन अबाध्यत्वं प्रातिभासिकेषु वर्तते, इति तेषां पक्षत्ववारणम् उपपद्यते ।

किन्तु तात्पर्यप्रमायाः शाब्दबोधहेतुत्वे अन्योन्याश्रयः भवति इति बहुभिः तयोः कार्यकारणभावः नाभ्युपगम्यते। विवरणे तत् खण्डितञ्च । अतः इदमपि विशेषणत्वेन नोपयुज्यते।।

तस्मात् मोक्षहेतुज्ञानान्येन अबाध्यत्वे सति इति पक्षः विशेषणीयः। इदन्तु विशेषणं सर्वमतसाधारणं शुतिरूप्यादिव्यावर्तकञ्च। अतो न दोषः –

एवमपि शशशृङ्गादौ असति वाधः। यतः, मोक्षहेतुज्ञानान्येन अबाध्यत्वम् ब्रह्मभिन्नत्वञ्च इति द्वयम् अत्र पक्षतावच्छेदकम्। तदुभयमपि असति वर्त्तते तस्य अबाध्यत्वात् ब्रह्मप्रतियोगिकभेदसत्वाच्च। एवञ्च पक्षतावच्छेदकाश्रये तस्मिन् सत्यत्वं नास्ति, इति अंशतः बाधः।।

अतः असतः शशशृङ्गादेः अपक्षत्वाय असत्वानधिकरणत्वे सति इति द्वितीयं पक्षविशेषणं देयम्। इदानीं शशशृङ्गादेः असत्वानधिकरणत्वाभावात् पक्षाद्व्यावृत्तिः उपपद्यते।

तथा च ब्रह्मप्रमान्येन वा वेदान्ततात्पर्यप्रमितिजन्यज्ञानान्येन वा मोक्षहेतुज्ञानान्येन वा अबाध्यत्वे सति असत्वानधिकरणत्वे सति ब्रह्मभिन्नं इति पक्षः। विमतम् इति वा पक्षः विप्रतिपत्तिविषयतावच्छेदकावच्छिन्नं इति तदर्थः

**साध्यनिर्देशः –**

सत् परमार्थसद्वा साध्यम्। ब्रह्मण्येव सत्त्वम्। तदतिरिक्ते कुत्रापि सत्त्वम् नास्ति। प्रपञ्चे व्यावहारिकसत्त्वं नाम सत्त्वेन व्यवहारमात्रम्। न तु यत्किञ्चित्सत्त्ववत्त्वम् इति ये अभ्युपगच्छन्ति अद्वैतिषु, तान् प्रति सत् इति साध्यं । ये तु पुनः व्यवहारदशायाम् अबाध्यत्वरूपं व्यावहारिकसत्वं प्रपञ्चे अङ्गीकुर्वन्ति, तान् प्रति सत्त्वमात्रसाधने सिद्धसाधनं भवति । अतः तान् प्रति परमार्थसत्त्वं साध्यते ।

ननु अनुमातृणां द्वैतिनां मते एकविधमेव सत्वम्। अतः तैः परमार्थसत् साधयितुं न शक्यते। परमार्थत्वेन व्यावर्तनीयस्य सत्त्वान्तरस्य अप्रसिद्ध्या, सत्त्वे परमार्थत्वस्य विशेषणत्वासम्भवात् इति चेत्,

सत्यम्। यद्यपि मन्मते व्यावर्त्यम् अप्रसिद्धम्। तथापि तन्मते पूर्वपक्षिणां मते व्यावर्त्यस्य प्रसिद्धत्वात् सिद्धसाधनवारणाय विशेषणप्रक्षेपः उपपद्यते। परार्थानुमाने परं प्रति सिद्धसाधनवारणाय, अन्यतरपक्षे व्यावर्त्यप्रसिद्धिम् आदाय विशेषणप्रक्षेपः कर्तुं शक्यते।

तथा हि **जन्यकृत्यजन्यानि भावकार्याणि स्वोपादानगोचरा-परोक्षज्ञान - चिकीर्षा - कृतिमज्जन्यानि। समवेतत्वे सति प्रागभावप्रतियोगित्वात्** इति तार्किकैः मीमांसकं प्रति ईश्वरसाधकम् अनुमानम् उपन्यस्तम्। अत्र जन्यकृत्यजन्येषु क्षित्यङ्कुरादिषु कृतिमज्जन्यत्वसिद्धौ, नित्यकृतिमान् ईश्वरः सिद्ध्यति, इति अभिप्रायः।।

किन्तु, मीमांसकानां मते जन्यकृत्यतिरिक्ता कृतिः अप्रसिद्धा इति कृत्वा जन्यत्वस्य व्यवर्त्याप्रसिद्ध्या विशेषणत्वं न सम्भवति। ततश्च तद्घटितं जन्यकृत्यजन्यानि इति पक्षविशेषणं न देयम्। तथा सति भावकार्याणि इत्युक्ते, पक्षे मीमांसकस्य कृतिमज्जन्यत्वं सिद्धं इति सिद्धसाधनं स्यात् इति शंकायां, तत्र मण्यादिग्रन्थेषु एवं समाधानम् अभिहितम् जन्यत्वविशेषणस्य व्यावर्त्यम् अनुमातृणां प्रसिद्धमस्ति इत्यतः तस्य कृतौ विशेषणत्वसम्भवात्, मीमासकं प्रति सिद्धसाधनवारणाय पक्षे जन्यकृत्यजन्यानि इति विशेषणं दातुं शक्यते इति।

तद्वत् प्रकृतेऽपि परमार्थत्वविशेषणेन व्यावर्त्यं सत्त्वान्तरं अद्वैतिनः प्रसिद्धमस्ति इति तस्य विशेषणत्वं उपपद्यते। एवञ्च सत्त्वमात्रस्य प्रपञ्चे साध्यमाने परं प्रति सिद्धसाधनं भवति इति कृत्वा सिद्धसाधनोद्धाराय परमार्थसत्त्वं साध्यते इति न कोऽपि दोषः।

**हेतवः –**

प्रातिभासिकत्वानधिकरणत्वे सति असत्वानधिकरणत्वम् इति आद्यः हेतुः। दृष्टान्ते आत्मनि प्रातिभासिकत्व – असत्वयोः अनधिकरणत्वरूपहेतुः वर्तते, परमार्थसत्त्वञ्च अस्ति इति व्याप्तिग्रहः। एवम्, आत्मवत् प्रपञ्चे पक्षेऽपि प्रातिभासिकासद्वैलक्षण्यं हेतुः अस्तीति परमार्थसत्त्वं सिद्ध्यति ।

ननु परमार्थसत्त्वाभाववति शुक्तिरूप्यादौ असत्वानधिकरणत्वम् अद्वैतिनः वर्तते इति कृत्वा तन्मतरीत्या प्रातिभासिके व्यभिचारवारणाय प्रातिभासिकत्वानधिकरणत्वे सति इति विशेषणं हेतौ दत्तम्। किन्तु अनधिकरणत्वे सति इत्यनेनैव व्यभिचारवारणम् उपपद्यते। यतः प्रातिभासिकोऽपि कस्यचित् धर्मस्य अधिकरणमेव इति कृत्वा अनधिकरणत्वं तत्र नास्ति। ततश्च साध्याभाववति अनधिकरणत्वघटितहेतोरपि अभावात् न व्यभिचारः। एवञ्च प्रातिभासिकत्वरूपस्य हेतुविशेषणस्य व्यभिचारावारकतया व्यर्थविशेषणत्वात् व्याप्यत्वासिद्धिः इति चेत् न। व्यभिचारावरकत्वेऽपि असिद्धिवारकत्वेन सार्थक्यम् अस्ति। यथा **विमतं कृत्यजन्यं। शरीराजन्यत्वात्।** इत्यनुमाने शरीरत्वविशेषणस्य व्यभिचारवारकत्वं नास्ति। तथापि अजन्यत्वमात्रस्य हेतुत्वे पक्षे क्षित्यङ्कुरादौ अजन्यत्वं नास्तीति स्वरूपासिद्धिः स्यात्। अतः असिद्धिवारणाय शरीरत्वविशेषणम् उपयुज्यते इत्युक्तम्।। तथा प्रकृतेऽपि पक्षे प्रपञ्चे अनधिकरणत्वस्य अभावात् स्वरूपासिद्धिः स्यात्। अतः तद्वारणाय प्रातिभासिकत्वविशेषणं सार्थकं भवति ।

अथवा व्याप्तिग्रहौपयिकत्वेन विशेषणसार्थक्यम्। यथा **चक्षुरिन्द्रियं, तैजसं। रूपादिषु मध्ये रूपस्यैव अभिव्यञ्जकत्वात्। प्रदीपप्रभावत्।।** इत्यनुमाने रुपादिषु मध्ये इति विशेषणादाने कुत्रापि व्यभिचारो नास्ति। अतः व्यभिचारवारकतया न तस्य सार्थक्यम्। अपि तु दृष्टान्ते प्रदीपप्रभायां रूपातिरिक्तघटादिव्यञ्जकत्वात् रूपस्यैव अभिव्यञ्जकत्वं नास्ति इति, हेतुसाध्ययोः व्याप्तिग्रहः न भवति इति कृत्वा व्याप्तिग्रहार्थं रूपादिषु मध्ये इति विशेषणप्रक्षेपः। तथा प्रकृतेऽपि दृष्टान्ते आत्मनि अनधिकरणत्वस्य अभावात् व्याप्तिग्रहो न स्यात्। अतः तदर्थं प्रातिभासिकत्वविशेषणम् । इति व्याप्तिग्रहौपयिकत्वेन तस्य सार्थक्यम्।।

एवम् अनिषेध्यत्वेन प्रमां प्रति साक्षाद्विषयत्वम्, ईश्वरं प्रति साक्षादपरोक्षत्वम्, सप्रकारकाबाध्यार्थक्रियाकारित्वम्, आरोपित - मिथ्यात्वकत्वम्, कल्पकरहितत्वम्, इति अन्येऽपि पञ्चहेतवः मिथ्यात्वाभावरूपसत्यत्वसाधकत्वेन उपन्यस्ताः। एवञ्च, हेतुभेदेन प्रयोगभेदात् षड्भिः अनुमानैः अत्र मिथ्यात्वानुमानस्य सत्प्रतिपक्षः कृतः इति लभ्यते ।।

तथा च षड्भिः अनुमानैः मिथ्यात्वानुमानस्य प्रतिरोधे विश्वसत्यत्वं सुदृढं भवति ।।

**संदर्भ ग्रंथ**

1. न्यायामृतम्.पृ.सं. 186-187